shrIsthaladevIstotram

# શ્રીસ્થલદેવીસ્તોત્રમ્ અથવા શ્રીસ્થલદેવ્યષ્ટકમ્

## Document Information

Text title : Shristhala Devi Stotram

File name : shrIsthaladevIstotram.itx

Category : devii, devI, aShTaka

Location : doc_devii

Transliterated by : Vani V vanirvs at gmail.com

Proofread by : Vani V vanirvs at gmail.com

Latest update : September 26, 2020

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

September 26, 2020

*sanskritdocuments.org*

# શ્રીસ્થલદેવીસ્તોત્રમ્ અથવા શ્રીસ્થલદેવ્યષ્ટકમ્

રમ્યમન્દિરાન્તરે મૃગેન્દ્રપીઠ સંસ્થિતાં
રક્તવસ્ત્રસંયુતાં સુરક્તદન્તિકા શિવામ્ ।
નીલરત્ન-સન્નિભાં પ્રફુલ્લ-કઞ્જ-લોચનાં
શ્રીસ્થલે નિવાસિનીં મહેશ્વરીં નમામ્યહમ્ ॥ ૧॥

દીપ્ત-ભાસ્કરાનનાં ભુજાકલાપ-મણ્ડિતાં
ચણ્ડમુણ્ડઘાતિનીં પ્રચણ્ડ-વિક્રમાન્વિતામ્ ।
શૂલખડ્ગપાશ-ચાપ-સાયકૈર્વિભૂષિતાં
શ્રીસ્થલે નિવાસિનીં મહેશ્વરીં નમામ્યહમ્ ॥ ૨॥

સૈરિભાન્તકારિણીં સુરેન્દ્ર-દુઃખહારિણીં
ધૂમ્રનેત્રનાશિનીં નિશુમ્ભશુમ્ભઘાતિનીમ્ ।
રક્તબીજદારિકાં સમસ્ત-વિશ્વરક્ષિકાં
શ્રીસ્થલે નિવાસિનીં મહેશ્વરીં નમામ્યહમ્ ॥ ૩॥

કાલિકાં કપાલિનીં કૃપામયીં વિભાવતીં
દૈત્યસઙ્ઘભક્ષિકાં દિવૌકસાં હિતે રતામ્ ।
દુર્જનપ્રમાથિનીં નૃમુણ્ડમાલયા યુતાં
શ્રીસ્થલે નિવાસિનીં મહેશ્વરીં નમામ્યહમ્ ॥ ૪॥

નીલકણ્ઠ વલ્લભાં પ્રપન્ન ભીતિનાશિકાં
પાર્વતીં સરસ્વતીં સુમઙ્ગલાં ચ શઙ્કરીમ્ ।
દેવનાયકાદિભિર્નિરન્તરં પ્રપૂજિતાં
શ્રીસ્થલે નિવાસિનીં મહેશ્વરીં નમામ્યહમ્ ॥ ૫॥

અમ્બિકાં વિભૂતિદાં વિચિત્રશક્તિસમ્ભૃતાં
વિશ્વસિન્ધુતારિણીં કૃતાન્તભીતિહારિણીમ્ ।
સત્પ્રબોધદાયિકાં ધિયસ્તમો નિવારિકાં
શ્રીસ્થલે નિવાસિનીં મહેશ્વરીં નમામ્યહમ્ ॥ ૬॥

ભક્ત કલ્પવલ્લરીં સમગ્રસાધ્યસાધિકાં
ચણ્ડિકાન્દયાપરાં દરિદ્રદુઃખહારિણીમ્ ।
રત્નમાલયાવૃતાં પ્રદીપ્તતેજઉજ્જ્વલાં
શ્રીસ્થલે નિવાસિનીં મહેશ્વરીં નમામ્યહમ્ ॥ ૭॥

સૌમ્યભાવભાસિકાં સુરાઙ્ગનાં સુરાર્ચિતા-
મક્ષરાં નિરામયાં યશસ્કરાં ત્રિલોચનામ્ ।
ચન્દ્રબિમ્બ સન્નિભાં ત્રિલોકસુન્દરીમુમાં
શ્રીસ્થલે નિવાસિનીં મહેશ્વરીં નમામ્યહમ્ ॥ ૮॥

ચણ્ડિકાષ્ટકં ત્વિદં દિવાગમે સુરાલયે
યો નરઃ સમાહિતઃ પઠેત્સદા મુદાન્વિતઃ ।
સ્યાન્સ વિક્રમીગુણી સુપુત્રવાન્ નિરામયઃ
સત્કલત્રસંયુતઃ સુખી ધની ચ કોવિદઃ ॥

ઇતિ શ્રીસ્થલદેવીસ્તોત્રં સમ્પૂર્ણમ્ ।

Sarthal or Shristhala devi or aShTAdashabhUjA devI is worshipped in Kishtavad (kishtwar, kaShTavArakaH deshaH) in Haryana

Encoded and proofread by Vani V

*shrIsthaladevIstotram*
pdf was typeset on September 26, 2020

Please send corrections to *sanskrit@cheerful.com*